International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(5): 224-226
© 2019 IJSR
www.anantaajournal.com
Received: 26-07-2019
Accepted: 27-08-2019

**डॉ. प्रसाद गोखले**

सहायक प्राध्यापकः,
कविकुलगुरुकालिदाससंस्कृतविद्या
पीठम्, रामटेकम्, नागपुरम्,
महाराष्ट्र, भारत

# ग्रहणविचारः

**डॉ. प्रसाद गोखले**

## प्रस्तावना

"ग्रहणं नाम एका कौतूहलजनिका चमत्कारपूर्णा आकाशीयघटना। ग्राहकेन ग्राह्यं वस्तु यत्र गृह्यते तद्ग्रहणम् । गृह्यते अनेन इति ग्राहकः | ग्रहीतुं योग्यः ग्राह्यः । अत एव गृह्यते अनेन इति ग्रहणम्। एतच्च ग्रहणं तदैव भवितुमर्हति, यदा ग्राह्यग्राहकयोः अन्तराभावः स्यात्। अतो ग्राह्यग्राहकयोर्योगो ग्रहणम्। योगो नाम अन्तराभावः। अतः ग्राह्यग्राहकयोरन्तराभावः ग्रहणमिति । ग्रहणस्यास्य महत्वं भुवि विद्यमानसकलचराचरजीवजन्तुषु अस्त्येव । यथोक्तिः –

बहुफलं जपदानहुतादिके स्मृति पुराणाविदः प्रवदन्ति हि।
सदुपयोगि जने सचमत्कृति ग्रहणमिन्द्वनयोः कथयाम्यतः।।[१]

अस्ति ग्रहाणां पूर्वापर-याम्योत्तर ऊर्ध्वाधरम् इति अन्तरम् । अत्र किं पूर्वापरयाम्योत्तररोर्ध्वाधरान्तराणामभावो ग्रहणम्। किं वा पूर्वापरयाम्योत्तरान्तराभावो ग्रहणम् । अत याम्योत्तरान्तराभावो ग्रहणम्। किमुत ऊर्ध्वाधराभावो ग्रहणम्, अत्रोच्यते, ग्रहकक्षयोर्महदन्तरस्य विद्यमानत्वात् ग्राह्यग्राहकयोः ऊर्ध्वाधरान्तराभावः कल्पान्तेऽपि न स्यात् अतः ऊर्ध्वाधरान्तराभावः न। अथ वक्तव्यं पूर्वापरयाम्योत्तराभावो ग्रहणमिति न साधु, यतो हि विद्यमाने शरतुल्ये दक्षिणोत्तरान्तराभावो ग्रहणं भवत्येव । अथ वक्तव्यं पूर्वापरान्तराभावो ग्रहणं तत्र प्रतिपर्वणि ग्राह्यग्राहकयोः पूर्वापरान्तराभावः सत्वेऽपि न प्रति पर्वणि ग्रहणम् । अत्र अयं स्पष्टार्थः पूर्वापरान्तराभावे मानैक्यखण्डादूने शरे ग्रहणं मानैक्यखण्डतुल्ये शरे संयोगमात्रं भवति । यथा यथा मान्यैक्यखण्डात शर: न्यनः तथा तथा ग्राह्यबिम्बं ग्राहकबिम्बे प्रविशति । तावानेव ग्रासः।

ग्रहाणां क्रान्तिवृत्तीयान्तरं पूर्वापरान्तरं भवति। क्रान्तिवृत्ते राशिमण्डले वा मेषादिद्वादशराशीनां

Corresponding Author:
**डॉ. प्रसाद गोखले**
सहायक प्राध्यापक,
कविकुलगुरुकालिदाससंस्कृतविद्या
पीठम्, रामटेकम्, नागपुरम्,
महाराष्ट्र, भारत

परस्परं पूर्वापररूपेणस्थितत्वात् । ग्रहोपरिगतकदम्बप्रोतवृत्ते कदम्बस्थानात् ग्रहावधि शररूपमन्तरं यामन्योत्तरमन्तरं भवति। ग्रहाणां ऊर्ध्वाधरस्थितयोः कक्षयोरन्तर ऊर्ध्वाधरान्तरम् । अस्य न कदापि अन्तराभावः भवितुमर्हति यतो हि स्वस्वकक्षासु ग्रहाणां सततभ्रमणत्वात्।

पूर्णिमायां चन्द्रग्रहणस्य अमायां सूर्यग्रहणस्य च सम्भवनीयता। प्रत्येकस्याममायां पूर्णिमायाञ्च ग्राह्यग्राहकयोः पूर्वापरान्तराभावः सञ्जायते। पूर्णिमायां यद्यपि सूर्यचन्द्रयोः षड्राशितुल्यमन्तरं भवति, तथापि सूर्यविरुद्धदिशि भुवच्छाया चन्द्रराशितुल्या भवति इति तयोः सूर्यचन्द्रयोः एकस्यामेवसरलरेखायां स्थितिवशात् पूर्वापरान्तरं न भवति । अमान्तकाले तु ग्राह्यग्राहको रविचन्द्रौ सहैव तिष्ठतः दर्शः सूर्येन्दुसङ्गमः इति वचनम्। अनेन प्रकारेण अमान्ते पूर्णिमान्ते च ग्राह्यग्राहकयोः पूर्वापरान्तरस्यभावो भवत्येव । यदि तत्काल एव याम्योत्तरान्तरस्यार्थात् चन्द्रशरस्याभावः स्यात् तर्हि ग्रहणं सम्भवति । अत्रेदं विज्ञेयं यत् अत्र याम्योत्तरान्तरस्याभावः न स्यादत्यन्ताभाव इति । अत्र अभाव इत्यनेन ग्राह्यग्राहकयोः मानैक्यार्धादल्पान्तरमाचार्यैरङ्गीकृतम्। तेन शरस्याभावे सति अथवा मानैक्यार्धादल्पे शरे ग्रहणम् इति ज्ञेयम् । एवं सत्यपि ऊर्ध्वाधरान्तरे ग्रहणम् । तत्र हेतुः अस्मदादिदृष्टेरावरणीभूतत्वं तावत् ग्रहणकर्तृत्वं न तु ग्राह्यग्राहकयोः बिम्बसंयोगः।

नन्वर्कमाच्छादयतो ज्ञशुक्र
बिम्बे न तेजोभवमूर्तितायाः।
अतो जलात्मेन्दुरधः स्थितोऽस्य
ग्रहं विधत्ते जनदृष्टिबन्धम् ।।[२]

अत्र प्रसङ्गे आचार्यः सूर्यग्रहणं विना चन्द्रग्रहणनिरूपणमनुचितम् इति कथनं समर्थयति तद्यथा स्वकर्मप्रसाध्यवशात् अर्थात् प्रयासाल्पत्वेन लाघवात् चन्द्रग्रहणाधिकार पूर्व निरूपयति । अपि च लौकिकोदाहरणं यच्छति वदाम्यत्र सूचीकटाहक्रियावत् सूर्यबिम्बं बुधशुक्रयोर्बिम्बेऽधःस्थेऽपि नाच्छादयतः। बुधशुक्राभ्यां सूर्यग्रहणं न भवति। अल्पतेजो गोलो महातेजो गोलस्याच्छादको न स्यात् । जलमयत्वाभ्युपगमे तु सूर्यतेजोगोलसान्निध्येन तददर्शनादाच्छादकत्वाभाव इति भावः। अतः कारणात् अस्य सूर्यबिम्बस्याधः कक्षास्थित चन्द्रः जलगोलरूपः ग्रहणं जनदृष्टिप्रतिबन्धात्मकं करोति। चन्द्रस्याच्छादकत्वसम्भवात् चन्द्रकृतं सूर्यग्रहणं ज्योतिः शास्त्रसिद्धमिति भावः ।

अत्र आचार्याः पौराणिकमतं संस्थापयति –

परन्तु चन्द्रग्रहणं कथं स्यात्
तस्याधरे नास्ति पदार्थ एवम्।
अतोऽसुरो राहुररित्वतस्तो
गृहगस्त्यजत्येवमिह ग्रहश्चेत् ।।[४]

श्रुतिवचनानुसारेण ग्रहणस्य कारणं तमः सैंहिकेयो वा प्रदिष्टः राहुबै हस्तीभूत्वा चन्द्रमसमाच्छादयति इति।

राहुः कुभामण्डलगः शशाङ्क शशाङ्कगच्छादयतीनबिम्बम् ।
तमोमयः शम्भुवरप्रसादात् सर्वागमानामविरुद्धमेतत्।।[५]

अत्र सूर्यचन्द्रग्रहणे राहुरेव कारणीभूतः। यतो हि राहु म पातः। पातवशात् शरः, शरवशादेव ग्रहणम्, अतः अवश्यं ग्रहणे राहु हेतुर्भूतः। राहुग्रस्ते दिवाकरे निशाकरे च इति स्मृतिवाक्यपर्यालोचनेन च राहुरेव सूर्यचन्द्रग्रहणयोर्ग्राहक इति पूर्वपक्षः। ननु राहोर्ग्रहणकर्तृत्वे प्रोच्यमाने राहुणा सूर्यचन्द्रतुल्येन भवितव्यम् । यतः पूर्वपरान्तराभावं विना ग्रहणं वक्तुं न शक्यते । नात्र ग्रहणं राहुणा सह पूर्वापरान्तराभावो दृश्यते न तु राहोः ग्राहकत्वमिति सिद्धान्तः। ग्रहणे ग्राह्यग्राहकयोः पूर्वापरान्तराभावः उच्यते तदयुक्तम् । यथा ग्रहाणामस्ते कालांशान्तरिते सूर्यात् ग्रहे सति ग्रहस्तादिरिति मन्यन्ते। राहौ ग्रहणादिबिम्बसंयोगमात्रं मन्यते कालांशान्तरा भावे परमं ग्रहणम् । यथा सूर्यग्रहान्तराभावे

परमास्तमय उच्यते । एते कालांशाः राहुवशेनैव मानैक्यखण्डतुल्यशरादुत्पन्ना युक्तियुक्ता एव सन्ति । अतः राहुणा ग्राहकेन कालांशान्तरितेन सूर्यचन्द्रौ ग्रस्तेति इति युक्तिः न युज्यते। यद्येवं तर्हि अस्तेऽपि सूर्यग्रहयोः पूर्वापरान्तराभावः वक्तव्यः ।

तत्र तु कालांशान्तरमङ्गीक्रियते तर्हि किमनेनापराद्धमिति ग्रहे प्रतिबन्धराहुरेव कारणमिति युक्तम् । राहुर्ग्रहणे कारणं परं तस्य राहोर्ग्राहकस्य बिम्बसिद्धिः कर्तव्या । परं तत् बिम्बं गगने नावलोक्यते। राहोर्बिम्बं ज्ञातुं नैव शक्यते अदर्शनादेव । अतः सति कुड्ये चित्रमिति न्यायात् राहोर्दाहकत्वं नैव सम्भवतीति सिद्धान्तः।

राहुः चन्द्रकक्षायां क्रान्तिमण्डलविमण्डलयोः सम्पातः । सूर्यग्रहणे सूर्यचन्द्रौ समकलौ सूर्यात् सप्ताल्पेष्टकालांशान्तर एव राहुः स पुच्छादियुतो मुखपुच्छाकारो वर्तते । अमृतास्वादनवेलायां छिन्नश्चक्रेण विष्णुना इति स्मृतिवाक्यबलेन राहुमुखं सम्पातात् कालांशान्तरितमस्तीति कल्पनीयमेव । यतः यदाकाशो दृश्यते तदेव गणितेन सिध्यतीति राहुमुखभावात् राहुमुखस्थानाज्ञानात् तस्य मुखहीनशरीरस्य सम्पातसंज्ञास्थानमङ्गीकृतम् । अतः सूर्यस्य ग्राह्यस्य राहुणा ग्राहकेण सह पूर्वापरान्तराभावोऽप्यस्ति । राहुशीर्षं तु चन्द्रबिम्बोपरि तत्समानमेव । एककक्षत्वात् तत् तुल्यत्वाच्च यत् चन्द्रबिम्बं श्यामं तदेव सूर्यग्रहणे सूर्यस्यावरणीभूतम् । तथा चन्द्रग्रहणे चन्द्रषड्भान्तरे सूर्यात् भूच्छायाऽपि षड्भान्तरे । चन्द्रभूच्छाये समाने । चन्द्रात् वृत्तसम्पात इष्टकालांशान्तरे सम्पातात् राहुशीर्षमपि कालांशान्तरे अतः राहुशीर्षं भूच्छायातुल्यम्। अत एव चन्द्रकक्षायां यावती छायाविस्तृतिः तावदेव राहुबिम्बम्। अतः चन्द्रग्रहणेऽपि राहुबिम्बं भूभातुल्यं चन्द्रस्यावरणीभूतम्। तयोः पूर्वापरान्तराभावोपि अस्ति। अतः बिम्बसिद्धिरपि अस्ति इति आगमप्रामाण्याच्च राहुः अवश्यं ग्रहणद्वयेऽपि कारणीभूतः वक्तव्यः इति सिद्धम्।

सूर्यग्रहणे चन्द्रबिम्बतुल्यं राहुबिम्बं, चन्द्रग्रहणे भूच्छायातुल्यं राहुबिम्बं । इदं तु न घटते यतः एककक्षास्थितस्य राहोर्बिम्बं महदन्तरितम् । चन्द्रबिम्बात् भूच्छाया तु त्रिगुणितासन्ना दूरस्थग्रहे बिम्बं लघुगतिश्च लघ्वी। समीपस्थे ग्रहे बिम्बं पृथुगतिश्च पृथ्वी । तत्र राहोर्गतिः सदा समैव । अतः बिम्बं लघु महत्वं न स्यादेव । अथ वक्तव्यं चन्द्रकक्षायां राहुः। यथा चन्द्रस्य ऊर्ध्वाधरगमनेन बिम्बलघुमहत्वम् तथैव राहुः इति। यतः चन्द्रबिम्बोर्ध्वाधरगमनवशेनैव यदास्य बिम्बेनाधिकं स्यात् तदा सर्वदा सूर्यग्रहणेऽपि चन्द्रबिम्बतुल्यमेव राहुबिम्ब नाधिकं स्यात् । परन्तु चन्द्रग्रहणे भूच्छायातुल्यं राहुबिम्बमुच्यते। अतः तत् न युक्तम्। यदि ग्रहणद्वयेऽपि चन्द्रबिम्बतुल्यमेव राहुबिम्बं वक्तव्यं तदा चन्द्रग्रहणे स्थितिमहती सूर्यग्रहणे स्थितिर्लघ्वी एवं कथं स्यात्। स्थितेः लघुमहत्वं तु प्रत्यक्षं ग्रहणे दृश्यते। अतः चन्द्रबिम्बतुल्यं राहुबिम्बं सर्वदा कल्प्यम् इति असत्।

## सन्दर्भा


1. सिद्धान्तशिरोमणिः, चन्द्रग्रहणाधिकारः, श्लोकः - १
2. सिद्धान्तसार्वभौमः, चन्द्रग्रहणाधिकारः, श्लोकः - २
3. सिद्धान्तसार्वभौमः, चन्द्रग्रहणाधिकारः, श्लोकः - १
4. सिद्धान्तसार्वभौमः, चन्द्रग्रहणाधिकारः, श्लोकः - ३
5. सिद्धान्त शिरोमणिः, चन्द्रग्रहणाधिकारः, श्लोकः - १०